राहुहा, [न्] पुं, ( राहुं हन्तीति । हन् + क्विप् । ) विष्णुः । इति हेमचन्द्रः ॥
राहूच्छिष्टः, पुं, ( राहोरुच्छिष्टः । ) लशुनः । इति त्रिकाण्डशेषः ॥ (अस्य विवरणन्तु रसोनशब्दे द्रष्टव्यम् ॥ )
राहूत्सृष्टः, पुं, ( राहुणा उत्सृष्टः परित्यक्तः । ) लशुनः । इति हारावली । २२३ ॥ ( अस्य विवरणं रसोनशब्दे द्रष्टव्यम् ॥ )
रि, श गतौ । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-सेट् । ) रेफादिः । श, रियति । इति दुर्गादासः ॥
रिक्तं, क्ली, (रिच् + क्तः ।) शून्यम् । वनम् । इति मेदिनी । ते, ५० ॥
रिक्तं, त्रि, (रिच् + क्तः ।) निर्धनम् । इति शब्दरत्नावली ॥ ( शून्यम् । यथा, मनुः ।८।४०५।
"भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः ।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः ॥")
रिक्तकं, त्रि, ( रिक्त + कन् । ) शून्यम् । इत्यमरः । ३ । १ । ५६ ॥ (यथा, मनुः । ८ । ४०४ ।
"पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे ।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान् ॥")
रिक्ता, स्त्री, ( रिच् + क्तः । टाप् । ) तिथिभेदः । सा तु चतुर्थी नवमी चतुर्द्दशी च । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥"
इति तिथ्यादितत्त्वम् ॥
कर्म्मसु तस्या निषेधविधौ यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा नामसदृक्फलाः ।"
न रिक्ता सर्व्वकर्म्मसु । इति ज्योतिःसारः ॥
"चन्द्रे चार्कजभार्किंशुक्रवियुते मध्येऽथवा पापयोः
लग्ना च यतिपातवैधृतिदिनं विहाय रिक्तां तिथिम् ।
क्रूराहायनचैत्रपौषरहिते लग्नांशके मानुषे ।
रिक्तासु विधवा कन्या दर्शेऽपि स्याद्विवाहिता ।
शनैश्चरदिने चैव यदि रिक्ता तिथिर्भवेत् ।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिनी ॥"
इति दीपिका ॥
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च लक्ष्मेतरे ।"
इति गुणवलभीमः ॥
"द्वादशी सप्तमी नन्दा रिक्तासु पञ्चपर्व्वसु ।
बलमायुर्यशो हन्यात् शिशूनामन्नभक्षणम् ॥"
इति ज्योतिश्चिन्तामणिः ।
"पूर्व्वाशाम्लकसर्पमूलरहितेष्वृक्षेष्वरिक्ते तिथौ
षष्ठे मासि सितेन्दुजीवदिवसे गोमर्थ्यमीनोदये ।
संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्दने ।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम् ।
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिने तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥"
इति विष्णुधर्म्मोत्तरः ॥

"पूर्व्वाग्नियाम्यफणिचित्रशिवान्यभेषु
रिक्ताष्टमीं विगतचन्द्रतिथिं विहाय ।
दाङ्गालिगोससुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ॥"
इति दीपिका ॥
"चन्द्रार्कयोर्भवेत् पूर्णा कुजे भद्रा जया गुरौ ।
बुधमन्दौ च नन्दायां शुक्रे रिक्ताम्हता तिथिः ॥"
इति भीमपराक्रमः ॥
"सर्व्वत्र कार्य्ये बुधजीवशुक्राः
केन्द्रत्रिकोणोपगताः प्रशस्ताः ।
तृतीयलाभारिगताश्च पापा-
स्तिथिर्विरिक्ता शुभदस्य चाहः ॥
इति दीपिका ॥
"चतुर्थी नवमी चैव रिक्ता चैव चतुर्द्दशी ।
शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया ।
गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः ॥
बुधमन्दगता नन्दा कुजे भद्रा जया गुरौ ।
भृगुरिक्ताम्हतं प्रोक्तं पूर्णा च रविचन्द्रयोः ॥"
इति ज्योतिःसागरसारः ॥
"षष्ठ्यष्टमीद्वादशीषु न गच्छेत्त्रिदिनस्पृशि ।
पूर्णिमाप्रतिपद्दर्शरिक्तावमदिनेषु च ।
तथा यमद्वितीयायां यात्रायां मरणं भवेत् ॥"
इति चतुर्व्वर्गसुक्तावली ॥
रिक्थं, क्ली, ( रिङ्क्ते बहिर्गच्छति गच्छतीति । रिच् + "पातृतुदिवचिरिचिसिचिभ्यस्थक् ।" उणा०२ । ७ । इति थक् ।) धनम् । इत्यमरः । २ । ६ । ९० ॥ ( यथा, मनुः । ८ । २७ ।
"बालदायादिकं रिक्थं तावत् राजानुपालयेत् ।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः ॥")
रिक्थहारी, [ न् ] त्रि, ( रिक्थं हरतीति । हृ + णिनिः । ) दायादः । धनहारी । यथा ।
"यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तोऽयं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च ।" इति मिताक्षरायां दायभागः ॥
रिक्थी, [न्] त्रि, (रिक्थमस्यास्तीति । रिक्थ + इनिः ।) धनहारी । धनी । ( यथा, याज्ञवल्क्यः । २ । २६ ।
"योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तमुद्धरेत् ॥")
रिक्षा, स्त्री, लिक्षा । यूका । इति हेमचन्द्रः । ४ । २७४ ॥
रिख, इ सर्पणे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् ।) इ, रिङ्खति । इति दुर्गादासः ॥
रिग, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) इ, रिङ्गति । इति दुर्गादासः ॥
रिङ्खणं, क्ली, ( रिखि + ल्युट् । ) स्खलनम् । इति हेमचन्द्रः । ६ । १५६ ॥ ( यथा,—
"सुताय रिङ्खणविधिं पादसंक्रमलक्षणः ।
कुमारः पञ्चवर्षीयः कलाभ्यासं विधास्यति ॥")
रिङ्गणं, क्ली, ( रिङ्ग + ल्युट् । ) स्खलनम् । इत्यमरः ॥ "इ धर्म्मादुत्पतितादप्रतिष्ठायां स्वकीय-

विधानादन्यथाभावे इत्यर्थः । औचित्यात् पिच्छिलादेश्च स्खलने । इति रमानाथः ॥ धर्म्मविलङ्घनं रिङ्गणमिति स्वामी ॥ बालानां हस्तपादाभ्यां चलनं रिङ्गणम् । पिच्छिलादौ पतनं स्खलनमित्यन्ये । एतन्मते भेदेऽप्यभेदोपचारेण सभे इत्युक्तम् । रग रिग लिगि गतौ अनट् । रिङ्खणमिति पाठे रखि रख रिखि सर्पणे इत्यस्य रूपम् ।" इति भरतः ॥
रिच, कि सम्पर्कवियोगयोः । इति कविकल्पद्रुमः ॥ ( चुरा०-पक्षे भ्वा०-पर०-अक०-सेट् । ) कि-रेचयति रेचति । रिङ्क्ते रिपुर्यदाक्रान्तो धनैर्मर्त्येष रेचति । रेचयन्ति च तमार्य्य इति हलायुधः । इति दुर्गादासः ॥
रिच, इर् ध ञ औ विरेके । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-अक०-अनिट् ।) विरेकः पौनःपुन्येन पुरीषोत्सर्गः । इति चतुर्भुजः । इर्, अरिचत् अरैक्षीत् । ध ञ, रिणक्ति रिङ्क्ते अतिसारकी । औ, रेक्ता । इति दुर्गादासः ॥
रिज, ङ भर्ज्जने । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) भर्ज्जनं भर्जने । ङ, रेजते । इति दुर्गादासः ॥
रिषमः, पुं, कामः । वसन्तः । इति विश्वः ॥
रिपुः, पुं, ( अनिष्टं रपतीति । रप वाचि + "रपेरिच्चोपधायाः ।" उणा० १ । २७ । इति कुः इकारश्चोपधायाः । "रिप कत्थनयुद्धनिन्दाहिंसादानेषु । 'ईषिः किच्च ।' उणा० १ । १४ । इति बाहुलकात् प्रत्ययः । रिपति केचित् पठन्ति । तत्र बाहुलकादेव ककारस्य पकारः । रिपति मोक्षार्थं युध्यते हिनस्ति वा निन्दति च सत्पुरुषैः ।" इति निघण्टुटीकायां देवराजयज्वा । १ । २४ । ४ ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ ( यथा, हितोपदेशे ।
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥" )
शरीरस्यषड्रिपवो यथा । कामः क्रोधः लोभः मोहः मदः मात्सर्य्यञ्च । तथा हि ।
"आस्थाय योगमवजित्य च वैरिषट्क-
मावध्य चेन्द्रियगणं मनसि प्रसन्ने ।"
इत्यादि तन्त्रसारे भुवनेश्वरीस्तोत्रम् ॥ ● ॥ चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ लग्नापेक्षया षष्ठलग्नम् । तत्पर्य्यायः । षट्कोणम् २ रिपुमन्दिरम् ३ । यथा,—
"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् ।
द्युनं द्यूनं तथाख्यातं षट्कोणं रिपुमन्दिरम् ॥"
अपि च ।
"सुनीचगेऽस्तगेऽपि वा रिपोर्गृहे स्थिता ग्रहाः ।
दशा फलं प्रकीर्त्तितं समस्तमेव सूरिभिः ॥"
अन्यच्च ।
"अरातिभवयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरित्येन चिन्तनम् ॥"
इति ज्योतिस्तत्त्वम् ॥